॥ उमामहेश्वरस्तोत्रम् ॥

श्री शङ्कराचार्य कृतम् ।

नमः शिवाभ्यां नवयौवनाभ्याम् ।

परस्पराश्लिष्ट वपुर्धराभ्याम् ।

नागेन्द्रकन्यावृषकेतनाभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ १ ॥

नमः शिवाभ्यां सरसोत्सवाभ्याम् ।

नमस्कृताभीष्टवरप्रदाभ्याम् ।

नारायणेनार्चितपादुकाभ्यां ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ २ ॥

नमः शिवाभ्यां वृषवाहनाभ्याम् ।

विरिञ्चिविष्ण्विन्द्रसुपूजिताभ्याम् ।

विभूतिपाटीरविलेपनाभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ३ ॥

नमः शिवाभ्यां जगदीश्वराभ्याम् ।

जगत्पतिभ्यां जयविग्रहाभ्याम् ।

जम्भारिमुख्यैरभिवन्दिताभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ४ ॥

नमः शिवाभ्यां परमौषधाभ्याम् ।

पञ्चाक्षरी पञ्जररञ्जिताभ्याम् ।

प्रपञ्चसृष्टिस्थिति संहृताभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ५ ॥

नमः शिवाभ्यामतिसुन्दराभ्याम् ।

अत्यन्तमासक्तहृदम्बुजाभ्याम् ।

अशेषलोकैकहितङ्कराभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ६ ॥

नमः शिवाभ्यां कलिनाशनाभ्याम् ।

कङ्कालकल्याणवपुर्धराभ्याम् ।

कैलासशैलस्थितदेवताभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ७ ॥

नमः शिवाभ्यामशुभापहाभ्याम् ।

अशेषलोकैकविशेषिताभ्याम् ।

अकुण्ठिताभ्याम् स्मृतिसंभृताभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ८ ॥

नमः शिवाभ्यां रथवाहनाभ्याम् ।

रवीन्दुवैश्वानरलोचनाभ्याम् ।

राकाशशाङ्काभमुखाम्बुजाभ्याम् ।

नमो नमः शङ्करपार्वतीभ्याम् ॥ ९ ॥

नमः शिवाभ्यां जटिलन्धरभ्याम्।
जरामृतिभ्यां च विवर्जिताभ्याम्।
जनार्दनाब्जोद्भवपूजिताभ्याम्।
नमो नमः शङ्करपार्वतीभ्याम्॥ १० ॥
नमः शिवाभ्यां विषमेक्षणाभ्याम्। बिल्वच्छदामल्लिकदामभृद्भ्याम्।
शोभावती शान्तवतीश्वराभ्याम्।
नमो नमः शङ्करपार्वतीभ्याम्॥ ११ ॥
नमः शिवाभ्यां पशुपालकाभ्याम्।
जगत्रयीरक्षण बद्धहृद्भ्याम्।
समस्त देवासुरपूजिताभ्याम्।
नमो नमः शङ्करपार्वतीभ्याम्॥ १२ ॥
स्तोत्रं त्रिसन्ध्यं शिवपार्वतीभ्याम्।
भक्त्या पठेद्द्वादशकं नरो यः।
स सर्वसौभाग्य फलानि भुङ्क्ते।
शतायुरान्ते शिवलोकमेति॥ १३ ॥
इति उमामहेश्वरस्तोत्रं सम्पूर्णम्॥